# अर्गला स्तोत्रम्

ॐ नमश्चण्डिकायै ।

मार्कण्डेय उवाच ।
ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥१॥

जय त्वं देवि चामुण्डे जय भूतार्ति हारिणि ।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥ २॥

मधुकैटभ विद्रावि विधातृ वरदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ३॥

महिषासुर निर्णाशि भक्तानां सुखदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ४॥

रक्तबीज वधे देवि चण्ड मुण्ड विनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ५॥

शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ६॥

वन्दिताङ्घ्रि युगे देवि सर्व सौभाग्य दायिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ७॥

अचिन्त्य रूप चरिते सर्व शत्रु विनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ८॥

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ९॥

स्तुवद्भ्यो भक्ति पूर्वं त्वां चण्डिके व्याधि नाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १०॥

चण्डिके सततं ये त्वां अर्चयन्तीह भक्तितः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ११॥

देहि सौभाग्य मारोग्यं देहि मे परमं सुखम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १२॥

विधेहि द्विषतां नाशं विधेहि बल मुच्चकैः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १३॥

विधेहि देवि कल्याणं विधेहि परमां श्रियम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १४॥

सुरासुर शिरो रत्न निघृष्ट चरणेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १५॥

विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ।

रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १६॥

प्रचण्ड दैत्य दर्पघ्ने चण्डिके प्रणताय मे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १७॥

चतुर्भुजे चतुर्वक्त्र संस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १८॥

कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १९॥

हिमाचल सुता नाथ संस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २०॥

इन्द्राणी पति सद्भाव पूजिते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २१॥

देवि प्रचण्ड दोर्दण्ड दैत्य दर्प विनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २२॥

देवि भक्त जनोद्दाम दत्तानन्दो दयेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २३॥

पत्नीं मनोरमां देहि मनोवृत्तानु सारिणीम् ।
तारिणीं दुर्ग संसार सागरस्य कुलोद्भवाम् ॥ २४ ॥

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।
स तु सप्तशतीं संख्या वरमाप्नोति सम्पदाम् ॥ २५॥

॥ इति श्रीअर्गलास्तोत्रं समाप्तम् ॥